## SK-104 बृहदारण्यकशाङ्करभाष्यम्-३,४

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

### A)द्वादशसु दश समाधत्त। 1x10=10

1. "जनको ह वैदेहः" इत्यादिना किं काण्डमारभ्यते?
2. सन्यासिनःयज्ञोपवीतादिलिङ्गपरित्यागे किं श्रुतिप्रमाणम्?
3. आर्तभागस्य प्रश्नसारः कः?
4. एषणात्रयं किम्?
5. आदित्याः कति? के ते?
6. अक्षरब्रह्मणः निरुपाधिकत्वे  किं प्रमाणम्?
7. याज्ञवल्क्यं प्रति आरुणिकृतः प्रश्नः कः?
8. "क्व पारिक्षिता अभवन्" इत्यस्योत्तरं किम्?
9. "न दृष्टेः द्रष्टारं पश्येः" अत्र भाष्योक्तः शब्दार्थः कः?
10. किमर्थं कहोलसंवादः आरब्धः?
11. "गार्गि मातिप्राक्षीः" इत्यस्य वचनस्य अभिप्रेतार्थः कः?
12. “यज्ञोपवीतादीनां साधनानां परित्यागः न शक्यते” इत्यत्र किं प्रमाणम्?

### B)सप्तसु पञ्च समाधत्त। 3x5=15

1. जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे।
2. कति ग्रहाः कत्यतिग्रहा इति ?
3. अथ हैनं कहोलः कौषीतकेयः पप्रच्छ।
4. यदिदं सर्वमप्सु ओतं च प्रोतं च कस्मिन्नु खल्वापः..।

5. एष त आत्मान्तर्याम्यमृतोऽदृष्टः द्रष्टा ....।

6. सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्।

7. स होवाच महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव।

**C)पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1. भुज्युब्राह्मणदिशा पारिक्षितानां गतिविचारः।

2. कहोलब्राह्मणदिशा पारिव्राज्यविधेः कर्मविधिविरोधाविरोधविचारः।

3. आरुणियाज्ञवल्क्यसंवादानुसारम् अन्तर्यामिस्वरूपम्।

4. शाकल्यब्राह्मणानुसारं देवताभेददर्शनपूर्वकं ब्रह्मस्वरूपप्रतिपादनम्।

5. चतुर्थाध्यायस्य द्वितीयब्राह्मणानुसारं जनकं प्रति याज्ञवल्क्योपदेशः।

**D)द्वयोरेकं समाधत्त।** **10x1=10**

1. गार्गिब्राह्मणदिशा प्रश्नोत्तरं संगृह्य निरुपाधिकब्रह्मस्वरूपं समन्त्रं निरूपयत।

2. याज्ञवल्क्यार्तभागसंवाददिशा ग्रहातिग्रहरूपमृत्युं व्याख्याय विद्वत्पुरुषस्य प्राणादयः

   उत्क्रामन्ति आहोस्विन्नेति इति परामर्शयत।

~~**~~

RKMVU/DSS/Int MA/14-19/J2017/SK-131

**SK-131 ब्रह्मसूत्रम् I.1-2**

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

**A)द्वादशसु दश समाधत्त।** **1x10=10**

1. ब्रह्मसूत्रे कति अध्यायाः? तेषां नामानि लिखत।
2. अन्यथाख्यातिमते अध्यासः कः?
3. गुहाप्रविष्टाधिकरणे विषयवाक्यं कुतः स्वीकृतम्?
4. अन्तरधिकरणे विषयवाक्यं किम्?
5. ब्रह्मविद्या किंप्रयोजना?
6. संस्कारो नाम कः?
7. अधिकरणस्य लक्षणं किम् ?
8. आत्मा "भोक्तैव केवलं न कर्ता" इति कस्य मतम्?
9. गुहाप्रविष्टाधिकरणस्य पूर्वपक्षः कः?
10. सर्वत्रप्रसिद्ध्यधिकरणे कति सूत्राणि सन्ति?
11. “आम्नायस्य क्रियार्थत्वात्...” केन प्रोक्तम्?
12. ब्रह्मणः सर्वज्ञत्वे किं सूत्रप्रमाणम् ?

**B)सप्तसु पञ्च समाधत्त।** **3x5=15**

1. अनुपपत्तेस्तु न शारीरः|
2. ईक्षतेर्नाशब्दम्|
3. तन्निष्ठस्य मोक्षोपदेशात्|
4. भेदव्यपदेशाच्च (वृत्तिकारदिशा)|

5. मान्त्रवर्णिकमेव च गीयते(भाष्यकारदिशा)|

6. अत्ता चराचरग्रहणात्|

7. न च स्मार्तमतद्धर्माभिलापात्|

**C)पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1. आकाशाधिकरणम्|
2. जन्माद्यधिकरणम्|
3. शास्त्रयोनित्वाधिकरणम्|
4. अन्तराधिकरणम्|
5. गुहाप्रविष्टाधिकरणम्|

**D)द्वयोरेकं समाधत्त।** **10x1=10**

1. "अथातो ब्रह्मजिज्ञासा" - इत्येतत्सूत्रं सदलकृत्यं व्याख्यात।
2. अध्यासभाष्यमधिकृत्य लघूपन्यासं कुरुत|

RKMVU/DSS/Int MA/12-17/J2017/SK-135

**SK-135 – ब्रह्मसूत्रे तृतीयाध्याये १,२,३ पादाः**

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

## A)पञ्च प्रश्नान् उत्तरत। 1x5=5

1. "पञ्चाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रदर्श्यते" कुतः?
2. ब्रह्मसूत्रस्य तृतीयाध्यायस्य नाम किम्?
3. बादरिमते चरणशब्दार्थः कः?
4. पूर्वपक्षे आत्मनः सेतुत्वं किमभिप्रायकम्?
5. जैमिनिमते कर्मफलदाता कः?
6. परस्य ब्रह्मणो देहादिषूपाधिष्वन्तरनुप्रवेशे श्रुतिप्रमाणं किम्?
7. “स्वाध्यायस्य तथात्वेन... “इत्यादि सूत्रे तथात्वेन इति शब्दस्य कः अर्थः?

## B)वाक्येनैकेन पञ्चानाम् उत्तरं लिखत। 1x5=5

1. सिद्धान्ते मूर्च्छावस्थायाः स्वरूपं किम्?
2. मुग्धाधिकरणस्य विशयः कः?
3. सुप्तो जीव एव प्रतिबुध्यते इत्यत्र सूत्रप्रमाणं किम्?
4. “संपरिष्वक्तः रंहति प्रश्ननिरूपणाभ्याम्" अत्र किं निरूपणम्?
5. प्रथमेऽश्रवणादिति चेन्न ... इत्यस्मिन् सूत्रे प्रथमशब्देन किमुच्यते?
6. "व्रीह्यादिषु संसर्गमात्रत्वमनुशयिनां भवति"कुतः?
7. अनिष्टादिकारिणः चन्द्रमसं गच्छन्तीत्यत्र श्रुतिप्रमाणं किम्?

## C)सप्तसु पञ्चानां अर्थप्रकाशं कुरुत। 3x5=15

1. “मायामात्रं तु......” इत्यादि सूत्रं व्याख्यात।]

2. “तदभावो नाडीषु....” इत्यादि सूत्रार्थं स्पष्टीकुरुत।

3. “न स्थानतः अपि...” इति सूत्रार्थं विषदयत।

4. “कृतात्यये अनुशयवान् ... ” इत्यादि सूत्रं यथाभाष्यं वर्णयत।

5. “अन्याधिष्ठितेषु पूर्ववदभिलापात्” इति सूत्रार्थं वर्णयत।

6. साभाव्यापत्त्यधिकरणसारं लिखत।

7. “प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः” इति सूत्रं यथाभाष्यं व्यख्यात।

**D)पञ्चसु त्रयाणामेव लघुटिप्प्पणीं कुरुत। 5x3=15**

1. इष्टादिकारिणः चन्द्रमसलोकतः निरनुशयाः अवरोहन्त्युत सानुशया इति कृतात्ययाधिकरणमाश्रित्य पूर्वोत्तरपक्षं विचारयत।
2. स्वप्ने रथादिसृष्टिः पारमार्थिकी उत मायामयीति सन्ध्यधिकरणपर्यालोचनया विचारयत।
3. उभयलिङ्गाधिकरणपर्यालोचनया ब्रह्मणः श्रुतिसम्मतं स्वरूपं दर्शयत।
4. पञ्चाग्निविद्यामाश्रित्य जीवो भूतसूक्ष्मैः सम्परिष्वक्तः, सति देहनाशे, गच्छतीति भाष्यदिशा विव्रियताम्।
5. फलाधिकरणसारं संगृह्णीत।

**E)अनुप्रियमेकम् अनुबध्नीत। 10x1=10**

1. पराधिकरणस्य सारं संगृह्णीत।
2. सन्ध्यधिकरणसारं यथाभाष्यं प्रतिपादयत।

***

RKMVU/DSS/Int MA/15-20/J2017/SK-161

**SK-161 वेदान्तसारः**

**समयावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

**A)यथेष्टं दशानाम् प्रश्नानां वाक्येन उत्तरं लिखत।** **1*10=10**

1. अज्ञानस्य एकत्वम् बोधयन्ती श्रुतिः का ?
2. वेदान्तो नाम कः?
3. पूरयत – "सतत्त्वतः... विवर्त इत्युदीरितः" ।
4. त्रिवृत्करणं कस्यामुपनिषदि श्रूयते ?
5. मननं किम् ?
6. समाधिसुषुप्त्योः को भेदः?
7. ब्रह्मणि अज्ञाननाशाय अपेक्षिता वृत्तिः का ?
8. नित्यादीनाम् उपासनानां च मुख्यम् प्रयोजनं किम् ?
9. भाट्टानाम् मते आत्मा कः?
10. मनोमयकोश इति केषां संज्ञा ?
11. नित्यनैमित्तिकयोरुपासनानाञ्च अवान्तरफलं किम् ?
12. कर्मेन्द्रियाणि कुत उत्पद्यन्ते ?

**B)यथेष्टं पञ्च समाधत्त।** **3*5=15**

1. अधिकारिणः शिष्यस्य आचार्यस्य च **कर्तव्यं** किम् ?
2. वेदान्तसारस्य अनुबन्धाः के ?
3. विश्ववैश्वानरयोः किं स्वरूपम् ?
4. अज्ञानस्य द्वे शक्ती के, तयोः कार्यं च किम् ?

5. विशेषाध्यारोपखण्डनेऽद्वैतिना प्रोक्ताः श्रुतियुक्त्यनुभवाः के (विशेषाध्यारोपाणां तु विवरणं **नेष्टम्**) ।
6. चतुर्विधशरीराणि कानि ?
7. शमादिषट्कं किम् ?

**C)यथाभिरुचि त्रीणि विशदयत। 5*3=15**

1. जीवन्मुक्तिं यथाग्रन्थं विवृणुत ।
2. **अजहल्लक्षणां** सदृष्टान्तं निरूप्य तत्त्वमसिवाक्ये तां खण्डयत ।
3. द्विविधं समाधिं सलक्षणं निरूपयत ।
4. विवर्तवादमुखेन ब्रह्मणि प्रपञ्चस्यापवादम् प्रदर्शयत ।
5. प्राणादिपञ्चकं नागादिपञ्चकं च प्रदर्श्य प्रत्येकं वायूनां कार्याणि निर्दिशत ।

**D)एकं व्याख्यात। 10*1=10**

1. तिसृष्ववस्थासु अज्ञानस्य तदुपहितचैतन्यस्य च व्यष्टिसमष्टिरूपेण भेदम् अभेदं च सदृष्टान्तं वर्णयत ।
2. मङ्गलश्लोकयोः तात्पर्यमुद्घाटयत ।

RKMVU/DSS/Int MA/14-19/J2017/SK-163

**SK-163 – वेदान्तपरिभाषा अर्थापत्यन्ता**

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

**A)यथाकामं पञ्च प्रश्नान् उत्तरत।** **1x5=5**

1. वेदान्तपरिभाषायाः कर्ता कः?
2. "संसर्गासङ्गि...प्रातिपदिकार्थता" इति सम्पूर्णं श्लोकं लिखन्तु।
3. वृत्तिः कतिविधा?
4. प्रमाणचैतन्यं किं भवति?
5. न्यायो नाम कः?
6. सविकल्पकस्य लक्षणं लिखन्तु।
7. मायायाः एकत्वे का श्रुतिः?

**B)वाक्येनैकेन पञ्चानाम् उत्तरं लिखत।** **1x5=5**

1. भूतभौतिकसृष्टयः इत्यत्र बहुवचनं किमर्थम्?
2. उपाधिलक्षणं लिखन्तु।
3. ग्रन्थकर्तुः गुरवः के?
4. घटादीनां बाधः कदा?
5. आकाङ्क्षालक्षणं लिखत।
6. वेदान्तानां तात्पर्यं कुत्र?
7. किं नाम अपौरुषेयत्वम्?

**C)सप्तसु पञ्चानां अर्थप्रकाशं कुरुत।** **3x5=15**

1. वृत्तिनिर्गमनप्रकारं यथाग्रन्थं दर्शयत।

2. सविकल्पकनिर्विकल्पकयोः लक्षणं विलिख्य समन्वयं प्रदर्शयत।

3. ज्ञानगतप्रत्यक्षस्य लक्षणं विलिख्य समन्वयं कुरुत।

4. मायायाः एकत्वं यथाग्रन्थं प्रतिपादयत।

5. विवर्तोपादानयोः भेदं प्रदर्शयत।

6. चैतन्यभेदान् प्रदर्श्य अन्तःकरणपरिणामः कथं भवतीति प्रतिपादयत।

7. साक्षिस्वरूपं प्रदर्शयत।

**D)पञ्चसु त्रयाणामेव लघुटिप्पणीं कुरुत। 5x3=15**

1. जीवसाक्षिणः ईश्वरसाक्षिणश्च भेदं प्रदर्शयत।

2. तत्त्वमस्यादिवाक्यानामखण्डार्थत्वं प्रदर्शयत

3. ज्ञानगतप्रत्यक्षत्वप्रयोजकविचारं यथाग्रन्थं लिखत।

4. वाक्यार्थज्ञानहेतून्निरुपयत।

5. वेदानां नित्यत्वम् अनित्यत्वञ्च विचार्य अपौरुषेयत्वमुपस्थापयत।

**E)अनुप्रियमेकम् अनुबध्नीत। 10x1=10**

1. कीदृशं वाक्यं प्रमाणमिति सकारणं निरूपयत।

2. आद्यस्य मङ्गलश्लोकस्य तथा व्याख्यानं कुरुत येनाद्वैतत्त्वं स्फुटो भवेत्।

***

RKMVU/DSS/Int MA/12-17/J2017/SK-165

**SK-165 – वेदान्तेतिहासो नैष्कर्म्यसिद्धिश्च**

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

**A)द्वादशसु दश प्रश्नान् उत्तरत।** **1x5=5**

1. सुरेश्वराचार्यमतानुसारेण दुःखं प्रति हेतुः कः?
2. सिद्धान्तमते मुक्तिः कया केन वा सिद्ध्यति?
3. सुरेश्वराचार्याणां गुरवः के?
4. सर्वानर्थः कः?
5. नैष्कर्म्यं नाम किम्?
6. "यत्सिद्धौ इदमः सिद्धिः" इत्यत्र कस्य सिद्धौ इदमः सिद्धिः?
7. संसृतेर्बीजं किम्?
8. ईश्वरप्रतिपत्तिप्रकाशस्य कर्ता कः?
9. तत्वबिन्दोः कर्ता कः?
10. अद्वैतसुधा केन रचिता?
11. तत्वालोकः कैः रचितः?
12. तत्वप्रदीपिकायाः कर्ता कः?

**B)यथारुचि पञ्चानां ससन्दर्भं व्याख्या कार्या।** **3x5=15**

1. "मुक्तेः क्रियाभिः सिद्धत्वाज्ज्ञानं तत्र करोति किम्"।
2. "न तत्स्यादुपकाराय भस्मनीव हुतं हविः"।
3. "संबन्धस्येह संसिद्धेर्ज्ञाने सत्यप्यदोषतः"।
4. "बाधितत्वादविद्यायाः विद्यां सा नैव बाधते"।

5. “प्रत्यग्धर्मैकनिष्ठस्य याथात्म्यं वक्ष्यते स्फुटम्”।

6. “मोहमात्रान्तरायत्वात्क्रियया ते न सिद्ध्यतः”।

7. “स्वर्गादिफलसम्बन्धात्काम्यं कर्म तथैव न”।

**C)यथाच्छन्दमेकं समाधेयम्। 5x1=5**

1. ज्ञानेनैव मुक्तिः, न कर्मणा इति सिद्धान्तमतं प्रतिपादयत।

2. तत्त्वमस्यादिवाक्यानि कथं स्वतस्सिद्धार्थं बोधयन्ति?

**D)यथाच्छन्दं द्वयं समाधेयम्। 5x2=10**

1. माधवाचार्यस्य कालं निर्धार्य कृतिपरिचयं कारयत।

2. सिद्धान्तलेशकर्तुः कालं निर्धार्य कृतिमाहात्म्यं ददत।

3. शंकराचार्याणामुत्तरवर्तिनामद्वैताचार्याणां यथाकालं कृतिसहितं परिचयं कारयत।

**E)अनुप्रियमेकम् अनुबध्नीत। 10x1=10**

1. गौडपादानां कालं सेतिहासं निर्धारयत।

2. प्रस्थानत्रयस्य यथेतिहासं परिचयं कारयत।

***

RKMVU/DSS/Int MA/12-17/J2017/SK-173

**SK-173 – अद्वैतसिद्धौ चिताः अंशाः**

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

**A)यथाकामं पञ्च प्रश्नान् उत्तरत।** **1x5=5**

1. घटादयः स्वानुगतप्रतिभासे वस्तुनि कल्पिताः इत्याद्यनुमानं केनोक्तम्?
2. अस्ति ब्रह्म इत्यत्र लकारः किमर्थं प्रयुक्तः?
3. ब्रह्मणो रूपादिहीनत्वेऽपि कुतश्चाक्षुषत्वम्?
4. त्रिविधं परिच्छिन्नत्वं किम्?
5. प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्, केषु?
6. विभक्तत्वं नाम किम्?
7. सज्ञेयत्वस्य कति विकल्पाः सिद्धान्तिनोपस्थापिताः, के च ते?

**B)वाक्येनैकेन पञ्चानाम् उत्तरं लिखत।** **1x5=5**

1. विपक्षबाधकसचिवमनुमानं कस्य बाधकम्?
2. परैरपि सर्वेन्द्रियग्राह्यत्वाभ्युपगमात् ,कस्य?
3. परीक्षा नाम का?
4. प्रत्यक्षस्य प्रामाण्यं कुतो न निश्चितम्?
5. शङ्खशुचित्वानुमानस्य उपजीव्यागमः कः?
6. यदि प्रतिहर्ता अपच्छिद्यात् किं प्रायश्चित्तं विहितम्?
7. औदुम्बरीं स्पृष्ट्वा उद्गायेत् इत्यदि वाक्यं केन यागेन सम्बद्धम्?

**C)सप्तसु पञ्चानां अर्थप्रकाशं कुरुत।** **3x5=15**

1. उपक्रमन्यायेन प्रत्यक्षस्य प्राबल्यं पूर्वपक्षानुसारेण निरुपयत।

2. तस्मान्न प्रतिहर्त्रपच्छेदस्य सर्वथा बाधः किन्तु प्रयोगान्तरे निक्षेपः।

3. अनात्मत्वं जडत्वमिति निरूपयत।

4. ज्ञानपदजन्यप्रतीतिविशेष्यभिन्नविवक्षायां उक्तदोषाभावात्।

5. अन्यथा सत्यं ज्ञानम् इत्यधिष्ठानानुवेध एव स्यात्।

6. उद्गात्रपच्छेदविषयं व्याख्यात।

7. कालतः परिच्छिन्नत्वं व्याख्यात।

**D)पञ्चसु त्रयाणामेव लघुटिप्पणीं कुरुत।** **5x3=15**

1. प्रत्यक्षस्य आगमबाध्यत्वं यथाग्रन्थं विचारयत।

2. पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्।

3. नह्युपजीव्यत्वमात्रेण प्राबल्यं किन्तु परीक्षिततया।

4. अपच्छेदन्यायं विवृणुत।

5. प्रत्यक्षस्य लिङ्गबाध्यत्वं यथाग्रन्थं विचारयत।

**E)अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1. अपच्छेदन्यायेन प्रत्यक्षस्य प्राबल्यमिति पूर्वपक्षं निराकुरुत।

2. सन् घट इत्यादिप्रतीत्या सर्वाधिष्ठानत्वेन ब्रह्मैवावभासतेति समर्थयत।

***

RKMVU/DSS/Int MA/12-17/J2017/SK-176

**SK-176 तत्त्वप्रदीपिका**

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

**A)द्वादशसु दश समाधत्त।** **1x10=10**

1. “प्रमाणनखनिर्भिन्न..” इत्यत्र प्रमाणपदेन किमभिप्रेतम्?
2. अनन्तपदस्य किंपरत्वं पूर्वपक्षिभिरभिप्रेतम्?
3. चित्सुखाचार्यस्य गुरुः कः?
4. यद्विपर्यये असमीहितप्रसक्तिस्तत्क्वचिन्मानयोग्यम् - कस्योक्तिरियम्?
5. किं नाम फलव्याप्यत्वम्?
6. सिद्धान्तमते मिथ्यात्वलक्षणं किम्?
7. प्रपञ्चसत्यत्वप्रतिपादिकाः काः श्रुतयः पूर्वपक्षिभिः प्रदर्श्यते?
8. वियदादेरात्मनां च सत्यभेदसाधकमनुमानं किम्?
9. प्रमाणागम्यत्वमिति मिथ्यात्वलक्षणे को दोषः?
10. ज्ञानस्य वेद्यत्वं प्रदर्शयितुं पूर्वपक्षिप्रदर्शितमनुमानं लिखत।
11. ज्ञाननिवर्त्यत्वमिति मिथ्यात्वलक्षणे का अनुपपत्तिः?
12. स्वप्रकाशस्य षष्ठविकल्पे को दोषः?

**B)सप्तसु पञ्च समाधत्त।** **3x5=15**

1. “आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः”।
2. अनुभूतित्वहेतौ न व्याप्यत्वासिद्धिदोषः|
3. “यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्"|
4. स्वव्यवहारहेतुप्रकाशत्वम् तत्खण्डनं च।

5. दृश्यत्वं नाम वृत्तिव्याप्यत्वम्।

6. सद्विलक्षणत्वं मिथ्यात्वम्।

7. सजातीयप्रकाशाप्रकाश्यत्वम्, तत्खण्डनं च।

**C)पञ्चसु त्रीन् समाधत्त। 5x3=15**

1. मिथ्यात्वे प्रमाणाभावः।

2. स्वप्रकाशत्वानुमाने हेतुदोषाः।

3. मिथ्यात्वानुमाने सिद्धान्तपक्षः।

4. स्वप्रकाशत्वानुमाने अवेद्यत्वसाध्यप्रसिद्धिः|

5. आत्मनः स्वप्रकाशत्वलक्षणम्।

**D)द्वयोरेकं समाधत्त। 10x1=10**

1. मिथ्यात्वस्य लक्षणं सपूर्वपक्षमालोचयत।

2. स्वप्रकाशत्वे प्रमाणं सिद्धान्तानुसारमालोचयत।

~~**~~

RKMVU/DSS/Int MA/15-20/J16-17/SK-213

**SK-213 सिद्धान्तकौमुद्यां समासप्रकरणम्**

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

**A)द्वादशसु दश समाधत्त।** **1x10=10**

1. प्रथमा निर्दिष्टमिति सूत्रे समासशब्दस्य कोऽर्थः?
2. अक्षशब्दस्य परीत्यव्ययेन सह कस्मिन्नर्थे समासो भवति?
3. पारे-मद्ध्ये इत्यत्र महाविभाषया किं सिद्ध्यति ?
4. अधिकार्थवचनं नाम किम् ?
5. पूर्वकायः इत्यत्र समासः केन सूत्रेण?
6. उपमितं व्याघ्रादिभिः कदा समस्यते ?
7. चिन्मात्रमित्यस्य विग्रहः कः ?
8. साक्षात्प्रभृतीनि कुत्र गतिसंज्ञकानि ?
9. कः समासः अतिङन्तः ?
10. ईशकृष्णौ इत्यत्र ईशशब्दस्य पूर्वनिपातः केन सूत्रेण ?
11. वेदे प्रसिद्धसाहचर्यं नाम किम् ?
12. द्वन्द्वे समासान्तः टच्प्रत्ययः केषाम् ?

**B)सप्तसु पञ्च समाधत्त।** **3x5=15**

1. समया ग्रामम्, आराद्वनादित्यादौ कुतः नाव्ययीभावः?
2. अश्वघासः इत्यत्र कः समासः ? केन हेतुना ?
3. विभाषा वृक्षमृगेति सूत्रे मृगशकुनिग्रहणं किमर्थम् ?
4. उपशरदम्। ससूत्रं रूपं साधयत।

5. स्तोकान्मुक्तः। ससूत्रं रूपं साधयत।

6. अनश्वः। ससूत्रं रूपं साधयत।

7. अग्नीषोमौ। ससूत्रं रूपं साधयत।

**C)पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1. पारेमद्ध्ये षष्ठ्या वा।

2. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः।

3. उपमानानि सामान्यवचनैः।

4. कुमारः श्रमणादिभिः।

5. विप्रतिषिद्धं चानधिकरणवाचि।

**D)द्वयोरेकं समाधत्त।** **10x1=10**

1. अव्ययं विभक्तिसमीपेत्यादिसूत्रं व्याख्यात।

2. प्रादिसमासः।

***

RKMVU/DSS/Int MA/13-18/J2017/SK-216

**SK-216 – सिद्धान्तकौमुद्यां तद्धितप्रकरणे अपत्याधिकारात् प्राग्वहतीयं यावत्**

**समयावधिः-होराद्वयम्** **पूर्णाङ्काः-50**

**A)यथेष्टं दशानां प्रश्ननानाम् एकेन वाक्येन उत्तरं लिखत।** **1x10=10**

1. समर्थानां प्रथमाद्वा इत्यत्र सामर्थ्यं नाम किम्?
2. अवृद्धाभ्यो नदीमानुषीभ्यः इत्यादिसूत्रे नदीत्यादि किम्?
3. आश्वपतम् इत्यत्र कः प्रत्ययः केन च?
4. तस्यापत्यम् इत्यत्र कृतसन्धेः इति किमर्थम्?
5. छागवृषयोरपि इत्यनेन वार्तिकेन कः प्रत्ययः विधीयते?
6. परिवृतो रथः इत्यत्र रथः इति किम्?
7. वुञ्छण्कठच्..... इत्यादि सूत्रं पूरयत।
8. शण्डिकादिभ्यः अभिजनार्थे कः प्रत्ययः भवति?
9. समादागतम् इत्यर्थे समशब्दात् कति रूपाणि भवन्ति कानि च तानि?
10. रोहिणः इत्यत्र प्रत्ययस्य लुक् केन सूत्रेण भवति?
11. औपजानुकः इत्यत्र कः प्रत्ययः केन सूत्रेण भवति?
12. संज्ञायां शरदो वुञ् इति सूत्रं कस्य अपवादसूत्रम्?

**B)यथेष्टं पञ्चानां ससूत्रसाधनं कुरुत।** **3x5=15**

1. आदिवृद्धिरन्त्योपधावृद्धी बाधते इति व्याख्यात।
2. गाणपतम् इति रूपं साधयत।
3. यौष्माकीणः इति रूपं साधयत।
4. प्रत्यययोत्तरपदयोश्च इति सूत्रं व्याख्यात।

5. चटकाया ऐरक् इति सूत्रं व्याख्यात।

6. गोत्राद्यून्यस्त्रियाम् इति सूत्रं व्याख्यात।

7. आथर्वणिकस्येकलोपश्च इति सूत्रं व्याख्यात।

**C)यथेष्टं त्रयाणामुत्तरं लिखत।** **5x3=15**

1. गङ्गायाः अपत्यं पुमान् इत्यर्थे कति रूपाणि भवन्ति कानि च तानि?

2. मातुरुत्संख्यासंभद्रपूर्वायाः इति सूत्रं व्याख्यात।

3. अणिञोरनार्षयोर्गुरूपोत्तमयो ष्यङ् गोत्रे इति सूत्रं व्याख्यात।

4. कुलाद् अपत्यार्थे यानि रूपाणि भवन्ति तानि साधयत।

5. शैषिकप्रकरणे कृते इत्यर्थे यानि सूत्राणि पठितानि तानि व्याख्यात।

**D)एकस्योत्तरं लिखत।** **10x1=10**

1. गोत्रयुवसंज्ञाविधायकानि सूत्राणि व्याख्यात।

2. चातुरार्थिकप्रकरणे पठितानि युक्तवद्भाववचनविषयकसूत्राणि व्याख्यात।

RKMVU/DSS/Int MA/14-19/J2017/SK-221

## SK-221 - सिद्धान्तकौमुद्यां तिङन्ते भ्वादिप्रकरणम्

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

**A)दश समाधेयाः।** **1x10=10**

1. अकर्मकेभ्यः लकाराः केष्वर्थेषु ?
2. केन कारणेन वुग्गुणवृद्धी बाधते ?
3. आशीर्लिङि केन सूत्रेण सलोपः ?
4. एधामासेत्यत्र अस्तेर्भूभावः कुतः न ?
5. इट ईटि इति सूत्रेण किं विधीयते ?
6. स्तन्भेः इति योगविभागः किमर्थः?
7. गुपू धातोः आयप्रत्ययः कस्मिन्नर्थे ?
8. कम्धातोः परस्य च्लेः कः आदेशः ?
9. कस्य मते अनेकाक्षु सन्वद्भावदीर्घौ न स्तः ?
10. घस्लृ धातुः कुतः न सार्वत्रिकः?
11. कृपो रो लः इत्यत्र कथं पदच्छेदः?
12. जिज्ञासार्थे कस्माद्धातोः सन्?

**B)पञ्च समाधेयाः।** **3x5=15**

1. अनुप्रयुक्तस्यास्तेः भूभावः कुतो न ?
2. कुतः ऋतो भारद्वाजस्य इति सूत्रेण स्तुद्रुस्रुश्रुवां थलि इड्विकल्पः नास्ति ?
3. कथं तर्हि विज्ञापना भर्तृषु सिद्धिमेति, तज्ज्ञापयत्याचार्यः इत्यादि?
4. गुपादिभ्यः सन्नान्तात्कुतो तङ्?

5. भविता। ससूत्रं रूपं साधयत।

6. एधस्व। ससूत्रं रूपं साधयत।

7. गोपायति। ससूत्रं रूपं साधयत।

**C)त्रीणि समाधत्त।** **5x3=15**

1. प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च इति सूत्रं व्याख्यात।

2. तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् इति सूत्रं व्याख्यात।

3. अतो येयः इति सूत्रं व्याख्यात।

4. श्तिपा शपानुबन्धेन इत्यादिकारिकां व्याख्यात।

5. एधाञ्चकृढ्वे इति रूपं साधयत।

**D)एकं प्रश्नं समाधत्त।** **10x1=10**

1. लिट् लकारे अनुप्रयोगव्यवस्थां ससूत्रं वर्णयत।

2. सन्वल्लघुनि इत्यादिसूत्रं व्याख्यात।

***

RKMVU/DSS/Int MA/13-18/J2017/SK-223

**SK-223 सिद्धान्तकौमुद्याम् अदादितः चुरादिं यावत्**

**समयावधिः-होराद्वयम्** **सत्रम् ६** **पूर्णाङ्काः-५०**

**A)दश समाधेयाः** १ x १० = १०

1. जक्षति इति कस्मिन् लकारे कस्मिन् पुरुषे कस्मिन् वचने रूपम्?
2. ईशः से, ईशडजनोर्ध्वे च इति सूत्रयोः योगविभागः कथम्?
3. क्रीणाति इत्यत्र सार्वधातुकनिमित्तकगुणःकुतो न?
4. देहि इत्यत्र एत्वाभ्यासलोपविधायकं सूत्रं किम्?
5. कुर्वः इत्यत्र प्रत्यययोकारस्य नित्यं लोपः केन?
6. समीयात् इत्यत्र इण्धातुः कस्मिन् गणे पठितः?
7. आदिथ इत्यत्र नित्यमिडागमः कथम्?
8. बिभितः इत्यत्र इकारः कथम्?
9. प्रण्यपादि इत्यत्र चिण् केन?
10. सुन्वन्ति इत्यत्र यण् कथम्?
11. यन्ति इत्यत्र इयङादेशः कुतो न?
12. ज्ञपयति इत्यत्र ह्रस्वः केन सूत्रेण?

**B)द्वयोरेकं समाधत्त** ३ x १ = ३

1. नशेः षान्तस्य इति व्याख्यात।
2. राधोऽकर्मकाद् वृद्धावेवेति व्याख्यात।

**C)यथाभीष्टं चत्वारि ससूत्रं साधयत** ३ x ४ = १२

1. अघसत्

2. दीव्यति

3. आनर्च

4. शाधि

5. अतत

**D)द्वयोरेकं व्याख्यात** ५ x १ = ५

1. तनादिभ्यस्तथासोः

2. ओः पुयण्ज्यपरे

**E)यथाभीष्टं द्वे ससूत्रं साधयत** ५ x २ = १०

1. रुन्द्धः

2. जुहोति

3. अध्यैय

**F)यथाभीष्टम् एकं व्याख्यात** १० x १ = १०

1. गुणो वृद्धिः इत्यादिकारिकां प्रपञ्चयत।

2. अचिकीर्तत् इत्यत्र शङ्काम् उद्भाव्य समाधत्त।

*****

RKMVU/DSS/Int MA/13-18/J2017/SK-225

**SK-225 वैयाकरणसिद्धान्तकौमुद्यां सन्नन्ताल्लकारार्थं यावत्**

**कालावधिः - होराद्वयम्   सत्रम् -8   पूर्णाङ्काः - 50**

**A)द्वादशसु दश समाधत्त।   1x10=10**

1. अपह्नवे ज्ञः इति सूत्रस्य किमुदाहरणम्?
2. उपपराभ्याम् इति सूत्रस्य किमुदाहरणम्?
3. सपर इत्यस्य कोऽर्थः?
4. चायः की इति सूत्रेण किं विधीयते?
5. परेर्मृषः इत्यस्य किमुदाहरणमस्ति?
6. अवाद् ग्रः इत्यस्य किमुदाहरणम्?
7. जीवति अत्र धातुः सकर्मकः न वा?
8. अवक्षेपणं नाम किम्?
9. गन्धनं नाम किम्?।
10. उरस्यति इत्यस्य कोऽर्थः?
11. उपाद्यमः स्वकरणे अत्र स्वकरणपदार्थः कः?
12. अणावकर्मकाच्चित्तवत्कर्तृकात् किमुदाहरणमस्य?

**B)सप्तसु पञ्च समाधत्त।   3*5=15**

1. किरश्च पञ्चभ्यः इति सूत्रस्य व्याख्यां लिखत।
2. ईप्सति इति प्रयोगं सूत्रनिर्देशपूर्वकं साधयन्तु।

3. देध्मीयते इति प्रयोगं सूत्रनिर्देशपूर्वकं साधयन्तु।

4. समवप्रविभ्यः स्थः इति सूत्रस्य व्याख्यां कुरुत।

5. रीगृदुपधस्य च इति सूत्रस्य व्याख्यां लिखन्तु।

6. चिकीषति इति प्रयोगं सूत्रनिर्देशपूर्वकं साधयन्तु।

7. बोभूयते इति प्रयोगं सूत्रनिर्देशपूर्वकं साधयन्तु।

**C)पञ्चसु त्रीन् समाधत्त।** **5*3=15**

1. स्वपिस्यमिव्येञां यङि इति सूत्रस्य व्याख्यां लिखत।

2. यस्य हलः इति सूत्रस्य व्याख्या कार्या।

3. मिथ्योपपदात्कृञोऽभ्यासे इति सूत्रस्य व्याख्या कार्या।

4. स्मिपूङ्रञ्ज्वशां सनि इति सूत्रस्य व्याख्या कार्या।

5. नुगतोऽनुनासिकान्तस्य इति सूत्रस्याशयं प्रतिपादयत।

**D)द्वयोरेकं समाधत्त।** **10*1=10**

1. हलन्ताच्च इति सूत्रस्य यथाग्रन्थं तात्पर्यं लिखत।

2. कर्मवत्कर्मणा तुल्यक्रियः इत्यस्याशयं प्रतिपादयत।

RKMVU/DSS/Int MA/16-21/J2017/SK-237

**SK-237 लघुसिद्धान्तकौमुद्याम् अजन्तस्त्रीलिङ्गप्रकरणम्**

**कालावधिः - होराद्वयम्** **अङ्काः- ५०**

**A)यथाकामं दश प्रश्नान् उत्तरत।** **1*10=10**

1. स्त्रियाम् इति कीदृशं सूत्रम् ?
2. टिड्ढाण... इति सूत्रं पूरयत।
3. रात्री इत्यत्र केन कः स्त्रीप्रत्ययः?
4. अनङ्विधायकं सूत्रं किम् ?
5. विभाषा ङिश्योः इति सूत्रस्य वृत्तिं लिखत।
6. आदिश्यमानेषु ह्रस्वेषु एच कः स्यात् ?
7. सम्प्रसारणसंज्ञाविधायकं सूत्रं किम् ?
8. संप्रसारणाच्च इति सूत्रेण किं विधीयते ?
9. चतुरनडुहोः आम् कदा भवति ?
10. अष्टाभ्यः इत्यत्र कृतात्वनिर्देशः किं ज्ञापयति ?
11. वाक्यलक्षणं किम् अस्ति ?
12. शप्श्यनोर्नित्यम् इति सूत्रस्य अर्थं लिखत।

**B)यथाकामं पञ्च प्रश्नान् उत्तरत।** **3*5=15**

1. षिद्गौरादिभ्यश्च इति सूत्रं व्याख्यात।
2. हो ढः इति सूत्रं व्याख्यात।
3. ज्ञानानि इति रूपं साधयत।
4. लिट् इति रूपं साधयत।
5. भवती इति रूपं साधयत।

6. यूयम् इति रूपं साधयत।

7. अद्भिः इति रूपं साधयत।

**C)यथाकामं त्रीन् प्रश्नान् उत्तरत।** **5*3= 15**

1. वयसि प्रथमे इति सूत्रं व्याख्यात।

2. एकाजुत्तरपदे णः इति सूत्रं व्याख्यात।

3. सर्वासाम् इति रूपं साधयत।

4. राज्ञः इति रूपं साधयत।

5. चतस्रः इति रूपं साधयत।

**D)यथाकाममेकमुत्तरत।** **10*1=10**

1. अजाद्यष्टाप् इति सूत्रं व्याख्यात।

2. अव्ययसंज्ञाविधायकसूत्राणि व्याख्यात।

RKMVU/DSS-WW/Int MA/16-21/J2017/SK-237

## SK-237 लघुसिद्धान्तकौमुद्यामजन्तस्त्रीलिङ्गादारभ्याव्ययप्रकरणं यावत्

**कालावधिः - होराद्वयम्** **सत्रम् - 2** **पूर्णाङ्काः - 50**

**A)द्वादशसु दश समाधत्त।** **1x10=10**

1. औङ् इति कस्य संज्ञा?
2. चतुर् इति शब्दस्य स्त्रीलिङ्गे षष्ठीबहुवचने किं रूपं भवति?
3. इन्द्राणी इत्यस्य कः अर्थः?
4. बह्वी इत्यत्र केन सूत्रेण ङीष् प्रत्ययः?
5. जरा इति शब्दस्य प्रथमाबहुवचने किं रूपं भवति?
6. त्रि इति शब्दस्य स्त्रीलिङ्गे षष्ठीबहुवचने किं रूपं भवति?
7. मातृ इति शब्दस्य षष्ठ्येकवचने किं रूपं भवति?
8. यज्वन् इति शब्दस्य द्वितीयाबहुवचने किं रूपं भवति?
9. अरण्यानी इति शब्दस्य कः अर्थः?
10. दाक्षी इत्यत्र कः स्त्रीप्रत्ययः?
11. ङीनः नकारस्य इत्संज्ञा केन सूत्रेण भवति?
12. राजन् इति शब्दस्य सप्तम्येकवचने किं किं रूपं भवति?

**B)सप्तसु पञ्च समाधत्त।** **3*5=15**

1. मतये इति प्रयोगस्य सिद्धिः कार्या।
2. सर्वा इति प्रयोगस्य सिद्धिः कार्या।
3. वारिणी इति प्रयोगस्य सिद्धिः कार्या।
4. राजा इति प्रयोगस्य सिद्धिः कार्या।
5. लिड् इति प्रयोगस्य सिद्धिः कार्या।

6. प्रशान् इति प्रयोगस्य सिद्धिः कार्या।

7. माम् इति प्रयोगस्य सिद्धिः कार्या।

**C)पञ्चसु त्रीन् समाधत्त।** **5*3=15**

1. सर्वस्याम् इति रूपस्य सिद्धिप्रक्रियां लिखन्तु।
2. अद्ड्डुतरादिभ्यः पञ्चभ्यः इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
3. आङि चापः इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
4. अजाद्यतष्टाप् इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
5. द्विगोः इति सूत्रस्य सोदाहरणं व्याख्या कार्या।

**D)द्वयोरेकं समाधत्त।** **10*1=10**

1. प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
2. सर्वनाम्नः स्याड्ड्रस्वश्च इति सूत्रस्य सोदाहरणं व्याख्या कार्या।

RKMVU/DSS/Int MA/16-21/J2017/SK-238

**SK-238 - लघुसिद्धान्तकौमुद्यां तिङन्तप्रकरणम्**

**वेलावधिः -होरे                    सत्रम्-2                    पूर्णाङ्काः - 50**

**A)विंशतिं प्रश्नान् लघुवाक्येन उत्तरत।                    1x20=20**

1. छन्दोमात्रगोचरः लकारः कः ?
2. मध्यमपुरुषः कदा भवति ?
3. अभ्यासे चर्च इति सूत्रस्य अर्थः कः ?
4. हिन्योरुत्वं कुतः न ?
5. इतश्च इत्यस्य अर्थः कः?
6. कस्य जुसादेशः भवति ?
7. माङ्योगे कः लकारः ?
8. भूसुवोस्तिङीति सूत्रेण किं विधीयते ?
9. दीर्घस्य का संज्ञा ?
10. 'गोपाय' इत्यस्य धातुसंज्ञा केन सूत्रेण ?
11. 'गम्' धातोः मकारस्य 'छ' आदेशः केन सूत्रेण ?
12. आम्प्रत्यय...इत्यादिसूत्रे आम्प्रत्यय इत्यत्र कः समासः ?
13. तासस्त्योः सस्य हकारादेशः केन सूत्रेण ?
14. लिङः झस्य कः आदेशः ?
15. आमः परस्य णेः आयादेशः केन सूत्रेण ?
16. णौ चङ्युपधायाः ह्रस्वः इति सूत्रेण किं विधीयते ?
17. कम्धातोर्लुङि णिङभावपक्षे च्लेः कः आदेशः ?

18. अदेः लुङ्सनोः कः आदेशः ?

19. अचः परस्मिन् पूर्वविधौ इत्यस्यार्थः कः?

20. इणः लुङि कः आदेशः ?

21. ब्रुवः वच्यादेशः  कदा ?

22. दिवादिभ्यः कः विकरणप्रत्ययः ?

**B)षड् रूपाणि ससूत्रं साधयत।** **5x6=30**

1. भवेयुः
2. ऐधे
3. एधिषीष्ट
4. गच्छति
5. गोपायति
6. हतः
7. शेरते
8. जुहोति

RKMVU/DSS-WW/Int MA/16-21/J2017/SK-238

## SK-238 - लघुसिद्धान्तकौमुद्यां तिङन्तप्रकरणम्

**वेलावधिः - होरे** **सत्रम् - 2** **पूर्णाङ्काः - 50**

### A)विंशतिं प्रश्नान् लघुवाक्येन उत्तरत। 1*20=20

1. छन्दोमात्रगोचरः लकारः कः ?
2. आत्मनेपदसंज्ञा केषाम् ?
3. मध्यमपुरुषः कदा भवति ?
4. झस्य अन्तादेशः केन सूत्रेण ?
5. अभ्यासे चर्च इति सूत्रस्य अर्थः कः ?
6. लृङ्लकारः केन सूत्रेण विधीयते ?
7. हिन्योरुत्वं कुतः न ?
8. इतश्च इत्यस्य अर्थः कः?
9. कस्य जुसादेशः भवति ?
10. माङ्योगे कः लकारः ?
11. भूसुवोस्तिङीति सूत्रेण किं विधीयते ?
12. आडागमः केषु लकारेषु परेषु ?
13. दीर्घस्य का संज्ञा ?
14. 'गोपाय' इत्यस्य धातुसंज्ञा केन सूत्रेण ?
15. 'गम्' धातोः मकारस्य 'छ' आदेशः केन सूत्रेण ?
16. टिल्लकाराणामात्मनेपदानामेत्वं केन सूत्रेण ?
17. आम्प्रत्ययवदिति सूत्रे आम्प्रत्ययः इत्यत्र कः समासः ?

18. तासस्त्योः सस्य हकारादेशः केन सूत्रेण ?

19. लिङः झस्य कः आदेशः ?

20. आमः परस्य णेः आयादेशः केन सूत्रेण ?

21. णौ चङ्युपधायाः ह्रस्वः इति सूत्रेण किं विधीयते ?

22. कम्धातोर्लुङि णिङभावपक्षे च्लेः कः आदेशः ?

**B)षड् रूपाणि ससूत्रं साधयत।** **5*6=30**

1. भवतु
2. भवेयुः
3. अभविष्यत्
4. एधिष्यते
5. ऐधे
6. एधिषीष्ट
7. गच्छति
8. गोपायति

RKMVU/DSS/Int MA/15-20/J2017/SK-239

## SK-239 लघुसिद्धान्तकौमुद्यां कृत्तद्धितौ

**समयावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

### A)यथेष्टं दशानां प्रश्ननानाम् एकेन वाक्येन उत्तरं लिखत- 1x10=10

1. 'इह' इत्यत्र कः प्रत्ययः, केन च?
2. “शेषे” इत्यत्र शेषपदार्थः कः?
3. “तस्य भावस्त्वतलौ” इत्यत्र भावपदार्थं लिखत।
4. 'तृतीयः' इत्यत्र त्रेः सम्प्रसारणं केन?
5. “आभीक्ष्ण्ये णमुल् च” इत्यत्र आभीक्ष्ण्यं नाम किम्?
6. 'अलं दत्वा' इत्यत्र कथं नोपपदसमासः?
7. गोत्रसंज्ञाविधायकं सूत्रं किम्?
8. “अदूरभवश्च” इति सूत्रार्थं लिखत।
9. 'वैश्वामित्रः' इत्यत्र कः प्रत्ययः, केन च?
10. “लटः शतृशानचा....” इत्यादिसूत्रे लटा किं ज्ञाप्यते?
11. 'उष्णभोजी' इत्यस्य कोऽर्थः?
12. 'पक्त्रिमम्' इत्यत्र कः कृत्प्रत्ययः केन च?

### B)यथेष्टं पञ्चानाम् ससूत्रसाधनं कुरुत। 3x5=15

1. “किंसर्वनामबहुभ्योऽद्व्यादिभ्यः” इति सूत्रं वर्णयत।
2. गोत्रयूनोः भेदं स्पष्टीकुरुत।
3. 'प्रियंवदः' इति रूपं साधयत।
4. “आत्ममाने खश्च” इति सूत्रं व्याख्यात।

5. “प्राणिस्थादातो लजन्यतरस्याम्” इति सूत्रं व्याख्यात।

6. 'कियान्' इति रूपं साधयत।

7. “जनपदशब्दात्क्षत्रियादञ्” इति सूत्रं वर्णयत।

**C)यथेष्टं त्रयाणामुत्तरं लिखत -** **5x3=15**

1. “नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः” इति सूत्रं व्याख्यात।

2. “तेन तुल्यं क्रिया चेद्वतिः” इति सूत्रं व्याख्यात।

3. “समानकर्तृकयोः पूर्वकाले” इति सूत्रं व्याख्यात।

4. “आत्मन्विश्वजनभोगोत्तरपदात् खः” इति सूत्रं व्याख्यात।

5. “राष्ट्रावारपाराद्घखौ” इति सूत्रं व्याख्यात।

**D)एकस्योत्तरं लिखत -** **10x1=10**

1. कृत्यप्रकरणसारं लिखत।

2. “अतः कृकमिकंसकुम्भ...”इत्यादिसूत्रं पूरयित्वा वर्णयत।

RKMVU/DSS/Int MA/12-17/J2017/SK-243

**SK-243 महाभाष्ये 8-9 आह्निकानि**

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

**A)द्वादशसु दश समाधत्त।** **1x10=10**

1. आदेशग्रहणप्रयोजनं किम् ?
2. गोः णित्वात्वयोः कः परिहारः ?
3. संयोगस्य कुतो न दोषः ?
4. न पदान्तसूत्रे यलोपोदाहरणं किम्
5. प्रातिपदिकनिर्देशाः कीदृशाः?
6. प्रसक्तादर्शनं लोप इति चेत् कः दोषः ?
7. कथमेकेन द्विर्वचनशब्देन उभयार्थसिद्धिः ?
8. अचः परस्मिन्निति सूत्रस्य उदाहरणानि कानि ?
9. अपवादे उत्सर्गकृतं न भवतीत्यत्र किं ज्ञापकम् ?
10. अचः परस्मिन्निति सूत्रे विधिग्रहणस्योदाहरणं किम्?
11. आरभ्यमाणेऽपि योगे अनल्विधौ प्रतिषेधः कुतः न कर्तव्यः ?
12. पूर्वत्रासिद्धे न स्थानिवदिति स्वीकृते सूत्रे केषां पाठः त्यक्तुं शक्याः ?

**B)सप्तसु पञ्च समाधत्त।** **3x5=15**

1. स्थानिवद्भावस्यः ज्ञापकं किम्?
2. चङ्परनिर्ह्रासोदाहरणं प्रतिपादयत।
3. तत्र गाङ्प्रतिषेधः इति वार्तिकं वर्णयत।
4. अस्थानिवत्त्वे यङ्लोपे गुणवृद्धिप्रतिषेधः।

5. तत्रादेशलक्षणप्रतिषेधः इति वार्तिकं वर्णयत।

6. न वानुदेशिकस्य प्रतिषेधादितरेण भावः - वर्णयत।

7. प्रयोजनं तद्धितलुकि कंसीयपरशव्ययोर्लुकि च गोप्रकृतिनिवृत्त्यर्थम् इति वार्तिकं वर्णयत।

**C)पञ्चसु त्रीन् यथाग्रन्थं समाधत्त।** **5x3=15**

1. स्थानिवद्भावार्थं सूत्रमनपेक्षितम्।

2. पूर्वमात्रस्य विधिं प्रति स्थानिवद्भावः।

3. न पदान्तसूत्रे नियमपक्षं वर्णयत।

4. अचः परस्मिन्सूत्रे विधिग्रहणप्रयोजनम्?

5. अदर्शनं लोप इति सूत्रे सर्वप्रसङ्गनिवारणम्।

**D)द्वयोरेकं समाधत्त।** **10x1=10**

1. न पदान्तसूत्रस्य पदान्तशब्दार्थं भाष्यदिशा प्रतिपादयत।

2. द्विर्वचनेऽचि इति सूत्रस्य पञ्चार्थान् प्रतिपादयत।

***

RKMVU/DSS/Int MA/13-18/J2017/SK-257

**SK-257 परिभाषेन्दुशेखरे ५१-१३३ परिभाषाः**

**समयावधिः-होराद्वयम्** **सत्रम् ८** **पूर्णाङ्काः-५०**

---

## A)दश समाधेयाः १ x १० = १०

1. मध्येऽपवादन्यायाद्यपेक्षयानन्तस्येति न्यायः प्रबल उत न?
2. तस्यापत्यम् इति विधीयमानः प्रत्ययः पुंसि स्त्रियां वा कथं स्यात्?
3. चानुकृष्टं नोत्तरत्र इति परिभाषायाः ज्ञापकं किम्?
4. निरनुबन्धक-तदनुबन्धकपरिभाषे वर्णग्रहणे प्रवर्तते उत न?
5. स्वायम्भुवम् इति कथम्?
6. सादृश्यस्य भेदाघटितत्वं कथं ज्ञायते?
7. क्व बहुव्रीहौ तद्गुणसंविज्ञानं ग्राह्यम्?
8. गामादाग्रहणेष्वविशेष इति परिभाषाया ज्ञापकं किम्?
9. पर्जन्यवल्लक्षणप्रवृत्तिरित्यस्य विकारकृतो लक्ष्यभेदः स्वीक्रियते उत न?
10. पूर्वत्रासिद्धीयमद्वित्वे इति परिभाषाया लिङ्गं किम्?
11. बाधकशास्त्रस्य बाधकत्वे किं बीजम्?
12. आशंसायां भूतवच्च इत्यत्र लङ्-लकारस्यातिदेशः कुतो न?

## B)यथाभीष्टम् पञ्च समाधत्त ३ x ५ = १५

1. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः।
2. उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्।
3. तदनुबन्धकग्रहणे नातदनुबन्धकस्य।
4. प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम्।

5. नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे।

6. लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्।

7. पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते।

**C)यथाभीष्टं त्रीन् समाधत्त** **५ x ३ = १५**

1. स्वरविधौ व्यञ्जनमविद्यमानवत् इति परिभाषां व्याख्यात।

2. सन्नियोगशिष्टानामन्यतरापाये  इति परिभाषां व्याख्यात।

3. लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य  इति परिभाषां व्याख्यात।

4. अभेदका गुणाः इति परिभाषां व्याख्यात।

5. अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी इति परिभाषां व्याख्यात।

**D)यथाभीष्टम् एकं व्याख्यात** **१० x १ = १०**

1. सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येत्यादिकारिकां व्याख्यात।

2. श्तिपा शपानुबन्धेनेत्यादिकारिकां व्याख्यात।

RKMVU/DSS/Int MA/13-18/J2017/SK-266

**SK- 266- लघुशब्देन्दुशेखरे अजन्तप्रकरणम्**

**कालावधिः - होराद्वयम्  सत्रम् -8  पूर्णाङ्काः-50**

**A)द्वादशसु दश समाधत्त। 1x10=10**

1. प्रकृतित्वं नाम किम्?
2. के के सन्ति अयोगवाहाः?
3. न विभक्तौ तुस्माः इत्यत्र विभक्तौ इत्यस्य कोऽर्थः?
4. इत्संज्ञकत्वम् अनुबन्धत्वम् इति कस्य मतम्?
5. सुधिशब्दस्य प्रवृत्तिनिमित्तं किमस्ति?
6. विभक्तिश्चेति सूत्रे चकारग्रहणं किमर्थम्?
7. सुलुशब्दस्य प्रवृत्तिनिमित्तं किमस्ति?
8. एच इग्घ्रस्वादेशे, इति सूत्रघटके आदेशशब्दे कस्मिन्नर्थे घञ् प्रत्ययः?
9. अनेकाल्शित्सर्वस्य, इत्यत्र नागेशमते शित्वं नाम किम्?
10. ह्रस्वत्वं नाम किम्?
11. रमा, इत्येतद्घटके रम इति प्रातिपदिके कः कृत्प्रत्ययः?
12. ङेर्यः इति सूत्रे ङेः इत्यनेन कस्य ग्रहणम्?

**B)सप्तसु पञ्च समाधत्त। 3x5=15**

1. आदर्शेन इत्यत्र भाष्यरीत्या णत्ववारणप्रकारं लिखन्तु।
2. चुटू इति शास्त्रस्य यथाग्रन्थं व्याख्या कार्या।
3. ङसिङ्योः स्मात्स्मिनौ इति सूत्रस्य व्याख्या कार्या।

4. जरायाः जरसन्यतरस्याम् इति सूत्रस्य व्याख्या कार्या।

5. तस्माच्छसोः नः पुंसि इति सूत्रस्य व्याख्या कार्या।

6. रामाणाम् इत्यत्र सन्निपातपरिभाषाया अनित्यत्वेऽपि परत्वात् सुपि चेति सूत्रेण कथं न दीर्घः।

7. नुम्ग्रहणमनुस्वारोपलक्षणार्थम्, तच्चाकर्तुं शक्यमिति ग्रन्थस्य तात्पर्यं लिखन्तु।

**C)पञ्चसु त्रीन् समाधत्त। 5x3=15**

1. विभक्तिश्चेति सूत्रस्य व्याख्यां कुर्वन्तु।
2. अट्कुप्वाङ्नुम्व्यवायेऽपि इति सूत्रस्य व्याख्या कार्या।
3. बहुवचने झल्येत् इति सूत्रस्य व्याख्या कार्या।
4. ह्रस्वनद्यापो नुट् इति सूत्रस्य व्याख्या लेख्या।
5. परश्च इति सूत्रस्य व्याख्यां प्रतिपादयत।

**D)द्वयोरेकं समाधत्त। 10x1=10**

1. नामि इति सूत्रस्य यथाग्रन्थं व्याख्या विधेया।
2. कृत्तद्धितसमासाश्च इति सूत्रस्य यथाग्रन्थं व्याख्या कार्या।

RKMVU/DSS/Int MA/12-17/J2017/SK-268

**SK- 268 - लघुशब्देन्दुशेखरे स्त्रीप्रत्ययप्रकरणम् अव्ययीभावसमासश्च**

**कालावधिः - होराद्वयम्      सत्रम् -10      पूर्णाङ्काः - 50**

## A)द्वादशसु दश समाधत्त।    1x10=10

1. चटका इत्यत्र प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इत्यनेन कुतो नेत्वम्?
2. ङिद्वचनस्य न ङिदादेशानां ङित्त्वमित्यर्थे ज्ञापकता केन स्वीक्रियते?
3. लिङ्गमर्थनिष्ठं शब्दनिष्ठं वा?
4. चौरी इत्यस्य कोऽर्थः?
5. किं नाम वयः?
6. स्त्रीत्वं प्रत्ययद्योत्यं प्रत्ययवाच्यं वा?
7. जहत्स्वार्था कुत्र भवति?
8. प्रत्ययस्थात्कात्.....इत्यादिसूत्रे स्थाग्रहणं किमर्थम्?
9. स्त्रीप्रत्ययविधायकसूत्रेषु तदन्तविधौ किं प्रमाणम्?
10. इन्द्रत्वं जातिः न वा?
11. ऊङुतः इति सूत्रे ङकारस्य किं प्रयोजनम्?
12. समर्थः पदविधिरिति सूत्रे विधिशब्दः भावसाधनः कर्मसाधनः वा?

## B)सप्तसु पञ्च समाधत्त।    3x5=15

1. शैषिके कपि तु विकल्प एवेति ग्रन्थस्य तात्पर्यं लिखन्तु।
2. टाबृचि इति सूत्रस्य यथाग्रन्थं व्याख्या कार्या।
3. सन्निपातपरिभाषाया अनित्यत्त्वे किं प्रमाणमिति यथाग्रन्थं लिखन्तु।
4. प्राचां ष्फ तद्धितः इति सूत्रस्य तात्पर्यं प्रतिपादयन्तु।

5. सर्विका कारिका इत्यनयोः सिद्धिः कार्या।

6. सुपो धातुप्रातिपदिकयोः इति सूत्रस्य सोदाहरणं व्याख्या कार्या।

7. समाससंज्ञा-अव्ययीभावसंज्ञा इत्यनयोः कथं समावेश इति लिखन्तु।

**C)पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1. अपरिमाणविस्ताचितकम्बलेभ्यो न तद्धितलुकि इति सूत्रस्य व्याख्या विधेया।

2. ऊधसोऽनङ् इति सूत्रस्य व्याख्या कार्या।

3. विभाषा सपूर्वस्य इति सूत्रस्य व्याख्या विधेया।

4. अन उपधालोपिनोऽन्यतरस्याम् इति सूत्रस्य व्याख्या कार्या।

5. स्वाङ्गलक्षणं यथाग्रन्थं विस्तरेण प्रतिपादयन्तु।

**D)द्वयोरेकं समाधत्त** **10x1=10**

1. वक्ष्यमाणा इत्यत्र ङीप् कथं न भवतीति यथाग्रन्थं प्रतिपादयन्तु।

2. एकविभक्ति चापूर्वनिपाते इति सूत्रस्य यथाग्रन्थं व्याख्यां लिखन्तु।

RKMVU/DSS/Int MA/13-18/J2017/SK-271

**SK-271 वैय्याकरणभूषमसारे आदितः नामार्थप्रकरणं यावत्**

**कालावधिः - होराद्वयम् पूर्णाङ्काः - 50**

**A)द्वादशसु दश समाधत्त। 1x10=10**

1. आश्रये के स्मृताः ?
2. बोधकतारूपा शक्तिः कुत्र ?
3. कृञादौ सकर्मकत्वव्यवहारः भाक्तः इति नैय्यायिकमतं कुतः न युक्तम् ?
4. क्रियाभेदाय किं प्रवर्तते ?
5. प्रथमो वतिः कः ?
6. लिटः कस्मिन्नर्थे प्रयोगः?
7. किं नाम प्रवर्तनात्वम्?
8. लेट्लकारः कस्मिन्नर्थे भवति?
9. कर्म साकल्येन कतिविधम्?
10. स्वतन्त्रः कर्ता इत्यत्र स्वातन्त्र्यं नाम किम्?
11. अपायो नाम किम्?
12. सम्प्रदानकारकस्य भेदान् लिखत?

**B)सप्तसु पञ्च समाधत्त। 3x5=15**

1. फूत्कारत्वादिरूपेण वाच्यत्वेऽपि कुतः व्यापारस्य न नानार्थत्वम्?
2. घटो नश्यतीत्यत्र कः शाब्दबोधः ? तेन किं सिद्ध्यति ?
3. लक्षणप्रतिपदोक्तपरिभाषया धातुलक्षणे कुतः न अतिव्याप्तिवारणं भवति ?
4. कारकस्य कथं क्रिययैव साधुत्वम् ?

5. प्रवर्तनात्वं किमिति प्रतिपादयत।

6. परसमवेतत्वादि योजनेनापि कुतः द्वितीयातिप्रसङ्गवारणं न भवति ?

7. करणस्य विवक्षाधीनत्वे शक्तिविपर्ययादित्यत्र दोषं वारयत।

**C)पञ्चसु त्रीन् समाधत्त। 5x3=15**

1. प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधे पश्य मृगो धावतीत्यत्र कथमेकवाक्यताभङ्गः।

2. घञादिना सिद्धक्रिया अभिधीयत इत्यत्र मानं किम् ?

3. लिङर्थं विवृणुत।

4. कर्मकर्तृविषये व्यासमतानुसारं दोषमुपन्यस्य समाधानं विधेहि।

5. सप्तम्यर्थं प्रतिपादयत।

**D)द्वयोरेकं समाधत्त। 10x1=10**

1. सम्बोधनान्तमित्यादिकारिकाद्वयं व्याख्यात।

2. घञन्तेषु क्रियाबोधप्रकारं वर्णयत।

***

RKMVU/DSS/Int MA/13-18/J2017/SK-301

**SK-301 – ऋग्वेदीयसूक्तानि, निरुक्ते प्रथमाध्यायश्च**

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

**A)एकेन वाक्येन उत्तरत।** **1x10=10**

1. ब्रह्मा कुतः परिवृढः?
2. समाम्नायः समाम्नातः इत्यत्र समाम्नायपदार्थः कः?
3. भावो नाम कः?
4. बालाः किंप्रयोजनकाः?
5. बिल्मग्रहणं नाम किम् ?
6. साक्षात्कृतधर्माणः के ?
7. वचनम् इन्द्रियनित्यम् इति कस्य मतम् ?
8. के निपाताः?
9. सीमापदनिर्वचनं कथम् ?
10. अद्भुतं नाम किम् ?
11. षड् भावविकाराः इति कस्य मतम् ?
12. निघण्टवः के ?

**B)यथेष्टं पञ्च समाधेयाः।** **3x5=15**

1. इन्द्रसूक्तस्य ऋषिच्छन्दआदीन् लिखत।
2. समुद्रशब्दस्य सायणोक्ता अर्थाः के?
3. किं अजानन्तः उपक्षियन्ति इति उक्तं देवीसूक्ते?
4. सतो बन्धुमसति निरविन्दन् इत्यस्य आशयः कः?

5. रेतोधा आसन् इत्याद्यर्धर्चस्य अर्थं लिखत।

6. पुरुषस्य सहस्रशीर्षत्वं कथम् ?

7. पुरुषसूक्ताद् यथेष्टं मन्त्रद्वयम् उल्लिखत।

**C)यथेच्छं त्रीन् उत्तरत।** **5x3=15**

1. अहन् वृत्रं वृत्रतरं व्यंसम् इत्यादिमन्त्रं प्रपूर्य व्याख्यात।

2. आत्सूर्यं जनयन् इत्यादिमन्त्रं पूरयित्वा व्याख्यात।

3. उतामूं द्यां वर्ष्मणोपस्पृशामि इत्यादिमन्त्रस्य अर्थविकल्पान् लिखत।

4. कामस्तदग्रे समवर्तताधि इत्यादिमन्त्रं पूरयित्वा ग्रन्थानुगुण्येन विवृणुत।

5. यत्पुरुषं व्यदधुः....इत्यादिऋचं प्रपूर्य मन्त्रार्थं लिखत।

**D)एकं प्रपञ्चयत।** **10x1=10**

1. निरुक्तशास्त्रोत्पत्तिकारणं निरूप्य षड् भावविकारान् निरूपयत।

2. मन्त्राणाम् अर्थः अस्तीति ग्रन्थकारपक्षं साधयत।

***

# SK-311 अर्थसङ्ग्रहः

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

## A)द्वादशसु दश समाधत्त। 1x10=10

1. शाब्दीभावनायाम् इतिकर्तव्यतया कस्य अन्वयः?
2. जैमिनिप्रोक्तं धर्मलक्षणं किम्?
3. शास्त्रारम्भसूत्रार्थः कः?
4. महाप्रकरणं नाम किम् ?
5. उत्पत्तिविधेः लक्षणं किम्?
6. यागस्य कति रूपाणि? कानि च तानि?
7. को नाम अनारभ्यविधिः?
8. “ऐन्द्र्या गार्हपत्यमुपतिष्ठते” इत्यत्र ऐन्द्री मन्त्रः कः?
9. अर्थक्रमः कः?
10. नियमविध्युदाहरणं किम् ?
11. आरादुपकारकमित्यस्य अर्थः कः?
12. भूतार्थवादः कः?

## B)सप्तसु पञ्च समाधत्त। 3x5=15

1. धर्मलक्षणविचारः।
2. अधिकारविधिः।
3. लिङ्गवाक्ययोः बलाबलविचारः।
4. प्रयोगविधिस्वरूपम्।
5. प्रयोगविधौ अर्थप्रमाणम्।

6. सन्निपत्योपकारकम्।

7. संदशन्यायः।

**C)पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1. शाब्दीभावनायाः परिचयः।

2. अर्थवादः तद्भेदश्च।

3. विनियोगविधेः सहकारिप्रमाणं श्रुतिः।

4. “सोमेन यजेत ” इत्यत्र विशिष्टविधिविचारः।

5. विनियोगविधिना अङ्गाङ्गिसम्बन्धनिर्णये स्थानप्रमाणस्योपयोगिता।

**D)द्वयोरेकं समाधत्त।** **10x1=10**
